स्तोत्र - छापील

क्र. नं. १०८

संस्कृत

सावळ

॥ गुरुचरणपीयूष-
लहरी

केशवानंदीयविरचित:

६१८ । रखा ४३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥ अथ ॥

# श्रीगुरुवरगुरुपीयूषलहरी

श्रीस्वामी केशवानन्दनिर्मिता

भारतगौरवेत्याख्यातेमुद्रणयन्त्रालये
श्रीवेङ्कटेश,श्रीविठ्ठलाभ्यांमुद्रापिता

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

॥ ॐ ॥

# श्रीगुरुपीयूषलहरी

योलीलाधृतविग्रहःसुललितोलाभःपरोधीमतां ।
यश्चासौनिगमाब्धिपूर्णमथनादाविश्चकाराद्वयम्
योलीनांश्चरणारविन्दयुगलेदीनानूदृशामूमुचत् ।
सोऽव्याच्छ्रीगुरुनानकोगुरुवरोऽज्ञानान्धकाराप
हः ॥ १ ॥

यंवेदोपिनवेदवेदवपुषवेदान्तवेद्यंविभुं ।

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3) गु०                                                                                                   छ०

यंसंतःप्रवदंतिसंसृतिपरंसत्यस्वरूपंसमम् ॥
यंज्ञातुंमुनयोतितप्ततनवोऽतप्यंतपस्तन्वते ।
तंवन्देगुरुनानकंकलियुगेशान्तावतारंशिवम् ॥२॥
॥ १ ॥ येनेदंरचितंहिदृश्यमखिलंसंजीव्यतेलीयते ।
येनेदंस्थिरजंगमंचाविविधंव्याप्तभवद्भासते ॥
येनागःशतशालिनोल्पमतयोध्येयेनधौताःकलौ ।
तेनश्रीगुरुनानकेननितरांगोप्यस्त्वयाहंगुरो ॥३॥
यस्मैयज्ञकृतोहाविर्हुतभुजिक्षिप्तांदिशन्तीन्द्रते ।
यस्मैनिर्जरयक्षराक्षसगणाभीतानमस्कुर्वते ॥ ॥ १ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(3A)

यस्मैस्वंचसमर्पयंतियतयोलोकत्रयंबिभ्रते ।
तस्मैश्रीगुरुनानकायसततंत्रेधानमोमेसते ॥ ४॥
यस्माच्चंद्रमसाविभीतमनसाव्रीह्यादिपोपुष्यते।
यस्माद्भीतमनाःप्रचण्डकिरणोभानुश्चदेदीप्यते ॥
यस्माद्भीतिमितोविधातिविवशोवातश्चवेवेप्यते ।
तस्माच्छ्रीगुरुनानकान्ममसनोब्रह्माभयंयाचते ५
यस्याज्ञानवशाच्चराचरमिदंविश्वंविचित्रायते ।
यस्यानंदलवंवलंब्याविषयेरक्तोपिमुक्तायते ॥
यस्यापारविशुद्धरूपमचलंमुक्तिन्ददोध्यायते ।

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(५)





तस्यश्रीगुरुनानकस्याविमलंगीतंमयाम्नायते ६

यस्मिन्नास्तिनवेतिशब्दरचनाकेनापिनोनीयते ।

यस्मिन्योगिजनैश्चनिश्चलतरंचित्तंसमाधीयते ॥

यस्मिन्मग्नविनीतभीतमनसासारामृतंपीयते ।

तस्मिञ्श्रीगुरुनानकेसुमनसाशांतिःसमाश्रीयते

असारसंसारसमुद्रविभ्रमे ।

भ्रमन्मनोमेबहुदुःखदुर्दशं ॥

तरंगभंगैर्विषयेषुसंगमैः ।

कदाकृपालोकरुणांकरिष्यसि ॥ ८ ॥



॥ २ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(५A)

जगत्त्रयत्राणविधौधुरंधरं ।
तवांघ्रिफुल्लांबुजमेवसेवते ॥
परंप्रतीकारमपास्यसेमनः ।
शरण्यमन्यंचतृणायमन्यते ॥ ९ ॥
यतीन्द्रचित्तैकचकोरजीविकां ।
समस्तसंतापहरांमनोहराम् ॥
अबोधरात्रौममभानसंमुहुः ।
प्रतीक्षतेतेमुखचंद्रचंद्रिकाम् ॥ १० ॥
सतांमुखाब्जानिविकासयन्नसौ ।

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5)

गु०

जगत्त्रयंचापिविभासयन्नसौ ॥

कदामदज्ञानविभावरीसुतं ।

हरिष्यतित्वन्नयनारुणोद्गतम् ॥ ११ ॥

॥ ३ ॥ बलिष्ठकामादिभिरातुरासती ।

गरिष्ठगर्वादिभिराकुलासती ॥

अपास्यसात्वांनिरपत्रपासती ।

मतिर्मदीयावदकंवरिष्यति ॥ १२ ॥

स्वतःशुद्धंबुद्धंमतिगतिपरंवागविषयं ।

निराकारंसारंभवजलधिपारंनिरुपमम् ॥ ॥ ३ ॥

८०

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

अमंदानंदंचिद्घनमचलमाद्यंतविधुरं ।
नमामस्तन्नित्यंसुरनरनतंनानकगुरुम् ॥ १३ ॥
अहंभूयोभूयोभवहुतभुजादग्धमनसा ।
भवेभ्रामंभ्रामंधृतिविगलितोदुःखिततनुः
कदापूर्णानंदामृतमयमहाब्धौप्रपतितो ॥
महाशांतोहंस्यांतवकरुणयानानकगुरो ॥ १४ ॥
नवैश्रौतंस्मार्तंनतुनियमनंनापियमनं ।
नचप्राणायामंश्रवणमननंसँय्यमशतम् ॥
अकार्षंनोनानासनविरचनांदेहदमनां ।

" Joint project of the Rajavade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(८)





कृपांस्वामाश्रित्यप्रदिशभगवन्मुक्तिममलाम् १५

विचार्याचारंचेतत्वमपिदिशासिप्रत्यगभयं ।

ह्यखंडंचिन्मात्रंविगलितभवंसत्यमनघम् ॥

॥ ४ ॥ वरंनिर्वाणाख्यंशिवशिवविनेयायभगवं ।

स्तदातेमाहात्म्यंदिविभुविकथंविस्तृतातिमियात् ॥

अनेकब्रह्मांडेकतिपयजनाःसंतिगुरवो ।

भवत्तुल्यन्नैकंजगतिकलयामिध्रुवमहम् ॥

अधर्मिष्ठाऽजंतूंस्त्वमयिकरुणागारकृपया ।

समुद्धर्तुंयस्माद्धृततनुरतोभूरतुलनः ॥ १७ ॥



Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "A Joint Project of"

(6A)

विधिंमीमांसंतेकतिचनरताजैमिनिमते ।
परेसांख्येशास्त्रेप्रकृतिपरयोर्भेदभजनाः ॥
इतोन्येयोगादौविमलमतयोद्राग्गतिमिताः ।
परंतुत्वत्तोमेजगतिगतिरन्यानविमतेः ॥ १८ ॥
यदारभ्यस्वामिंस्त्वमिहजगतिप्रादुरभव ।
स्तदारभ्यैवाभूद्गुरुवरयमोनिश्चलमनाः ॥
यथासीतानाथेभुविसमवतीर्णेमुनिहिते ।
कुठारंहित्वाभूद्धरिपरशुरामोचलमनाः ॥ १९ ॥
नवैविष्णुंजिष्णुंभयदभुजगाधीशशयनं ।

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

(७)





करालव्यालैर्नौगरलगलशंभुंवृततनुम् ॥
नचैवान्यान्देवान्कठिनकरणान्विव्हलमना ।
भजामित्वाहित्वाविमलमतुलंनिर्भयमहम् ॥ २० ॥
कदाकान्तारेस्मिञ्जगतिभयदंकेसरिवरं ।
दयाखड्गंत्वत्तोगुरुवरसमासाद्यमतिमान् ॥
त्रिधाभेदंभित्त्वाकृशतनुतपस्वीशिशुरहं ।
समाधौवैधात्रंसुखमपिकरिष्याम्यणुसमम् ॥ २१
इतिदीनवचोदयानिधे ।
प्रलपंतंप्रलयांतमाश्रितम् ॥





Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अधुनापिनमांससमीक्षयन् ।
कुरुषेहाकथमश्ममानसम् ॥ २२ ॥
सततंविनयेनपृच्छते ।
खलुहित्वासकलंसमृच्छते ॥
इतिनोवदगच्छगाच्छमे ।
विमलंमुक्तिवरंचयच्छमे ॥ २३ ॥
कनकंनचकांतकामिनीं ।
नहिविद्यांशतधार्त्तिशामिनीं ॥
नतुकीर्तिमशेषगामिनीं ।

(7A)

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(8)

गु०

करुणांमेपरिदेहिपावनीम् ॥ २४ ॥
अधमादधमंहिदुर्गुणं ।
बहुदुःखैर्ग्रसितंचदुर्दमम् ॥
दलितंदुरितादिसंगमै ।
स्त्वरितंतारयमामतांद्रितः ॥ २५ ॥
फणिनांवमतांविषावलिं ।
किमुगंधंतनुतेनचंदनः ॥
अपिमामपराधशालिनं ।
कथमेनंनहिमोचयिष्यसि ॥ २६ ॥

॥ ६ ॥ लु० ॥६ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(8A)

गुरुनानकसूक्ष्ममीक्ष्यतां ।
क्षुधितःक्षुब्धमनाअयंजनः ॥
चरणंशरणंतवाश्रितः ।
करुणाऽन्नेनाहितोष्यतांत्वया ॥ २७ ॥
मृतिजन्मजरादिसंततौ ।
पततोमेखलुनापचीयते ॥
तवकीर्तिररंहिहीयते ।
यदिमेमुक्तिवरोनदीयते ॥ २८ ॥
बतमंदमतीन्मयासमं ।

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "Joint project of the"

(१)

गु०

भवजालेपतितांश्चदुःखितान् ॥
ननुमामपहायमोचयन् ।
भजसेकिंविषमांगुरोदृशम् ॥ २९ ॥
॥ ७ ॥ नितरांनिरयेपिसीदतः ।
कठिनंकिंनुममाऽमचेतसः ॥
इदमेकमसह्यमापतेत् ।
परितस्त्वांजनतायदालपेत् ॥ ३० ॥
विषयानलतापहारिणम् ।
भगवँस्त्वामतिशांतिकारिणम् ॥

ल०

॥ ७ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(9A)

अवबुध्यसमागतंसरः ।
कथमब्जाक्षजहासिमामलिम् ॥ ३१ ॥
नितरांनिगमोविलोच्यते ।
पुरुपापेनमयाविशोच्यते ॥
अथमेविषयेणरोच्यते ॥
वरदायंवदकेनमोच्यते ॥ ३२ ॥
सुकृतंनकृतंकुजन्मना ।
कृतमेवापिचदुष्कृतंमया ॥
करुणाकराकिंकरेणाकिं ।

Joint project of Rajavade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10)

गु०

कथनीयंकथयत्वमेवमे ॥ ३३ ॥
कतिकामविमोहविव्हला ।
अयिकारुण्यनिधेसमुद्धृताः ॥
॥ ८ ॥ अधुनातवकिंकृपागता ।
यदिमंसापतितंनपातिमाम् ॥ ३४ ॥
सुकृतप्रकृतीन्नरानवन् ।
नहिलोकोत्तरकीर्तिमान्भवेः ॥
क्रियतेमयिचेत्कृपात्वया ।
तवकीर्तिर्वदकीदृशीभवेत् ॥ ३५ ॥

ल०



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10A)

लघुगर्तगतंजनंजवात् ।
पथिकोप्युद्धरतेकृपावशः ॥
भवसागरपातशालिनं ।
ननुपुत्रंकिमुनोसमुद्धरेः ॥ ३६ ॥
गुरुनानकनामधारणा ।
त्वमुकूटस्थगुरुर्विभास्यतः ॥
अतिनिश्चलवस्तुसंत्यजं ।
श्चपलान्गन्तुमहंपरित्रपे ॥३७॥
परुषैर्वचनैर्यदिप्रभो ।

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(11)





तवरोषःसमुपागतोमहान् ॥
ततउद्धरमांदयानिधे ।
मुखरंसंसृतितोतिदुःखितम् ॥ ३८ ॥
प्रथमेवयसिप्रलालितः ।
खलुपुत्रःक्षमतेनुताडनाम् ॥
नकदाचनलालितःशिशु ।
र्भवतायंकिमुताड्यतेतराम् ॥ ३९ ॥
अहमेवतुपापपंजरः ।
पतितस्त्वांसमुपालभेत्वथा ॥

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com